(590) "जल घातने" (I-भ्वादिः-833. अक. सेट्. पर.) ज्वलादिः।(अ)

घातनं=तैक्ष्ण्यम् इति सि. कौमुदी।

जालकः-लिका, जालकः-लिका, जिजलिषकः-षिका, जाजलकः-लिका; जलिता-त्री, जालयिता-त्री, जिजलिषिता-त्री, जाजलिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चलधातुवत् (510) बोध्यानि। मित्संज्ञा तु नास्य धातोः भवति। अतः, जालयिता इत्यादौ उपधाह्रस्वो न। ज्वलादिपाठात् 'ज्वलितिकसन्तेभ्यो णः' (3-1-40) इति णप्रत्ययः विकल्पेन भवति। जलः-प्रजलः जालः=आनायः इति। लडयोरभेदात् [A]जडः इति माधवीयधातुवृत्तौ।

(591) "जल अपवारणे" (X-चुरादिः-1543. सक. सेट्. उभ.)

'लज' इत्येके इति सि. कौमुदी।

जालकः-लिका, जिजालयिषकः-षिका; जालयिता-त्री, जिजालयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचटधातुवत् (488) ज्ञेयानि। कर्मणि क्तप्रत्यये जालितः[B] इति रूपम्।

(592) "जल्प व्यक्तायां वाचि" (I-भ्वादिः-398. सक. सेट्. पर.)

जल्पकः-ल्पिका, जल्पकः-ल्पिका, जिजल्पिषकः-षिका, जाजल्पकः-ल्पिका; जल्पिता-त्री, जल्पयिता-त्री, जिजल्पिषिता-त्री, जाजल्पिता-त्री; जल्पन्-[1]व्यतिजल्पन्-न्ती, जल्पयन्-न्ती, जिजल्पिषन्-न्ती; — जल्पिष्यन्-व्यतिजल्पिष्यन्-न्ती-ती, जल्पयिष्यन्-न्ती-ती, जिजल्पिषिष्यन्-न्ती-ती; —

1. 'प्रतिषेधे हसादीनामुपसंख्यानम्' (वा. 1-3-15) इति कर्मव्यतीहारेऽपि आत्मनेपदं न। तेन शत्रैव।

[अ] 'जल घान्ये' इति क्षीरतरङ्गिण्यां धातुकाव्ये च पाठः। घान्यं=अतैक्ष्ण्यमित्यर्थः।

A. 'ज्वालेन तापेन चला जडाङ्गीरढालशोकद्रवलितप्रतापाः॥' धा. का. 2.21.

B. 'ओलण्डितादिरपि जालितदिव्यधामा निष्पीडितारिरनुनादितमर्त्यभावः।' धा. का 3.14.